अज्ञ + इष्ठ ।) सूर्य्यः । इत्युणादिकोषः ॥

अञ्जीरं, क्ली, (अञ्ज + भावे इन् स्त्रियां वा ङीप् अञ्जीम् अग्निकारित्वादि गुणं राति ददाति अञ्जी आतोऽनुपसर्गे इति कर्त्तरि कः । अथवा अञ्ज + ईरम्) स्वनामख्यातफलवृक्षविशेषः । आँजिर + इति पेयारा इति च भाषा । तत्पर्य्यायः । मञ्जुलं २ काकोदुम्बरिकाफलं ३ । अस्य गुणाः । शीतलत्वं । स्वादुत्वं । गुरुत्वं । वायुपित्तरक्तश्लेष्मशूलहृत्पीडाकफमुखवैरस्यनाशित्वं । अग्निकारित्वञ्च । लघ्वञ्जीरं तस्मादल्पगुणं । इति राजवल्लभराजनिर्घण्टौ ॥

अटनं, क्ली, (अट् + भावे ल्युट्) भ्रमणं । (यथा सर्व्वं खलमधीश्वरत्वमगमत् त्वां माञ्च भिक्षाटनं । इति घटकर्परः ॥)

अटनिः, स्त्री, (अटति तथा गच्छति यत्र अट् + अधिकरणे अनि) धनुरग्रभागः । धनुकेर डल् इति भाषा । इत्युणादिकोषः ॥

अटनी, स्त्री, (अटनि + स्त्रियाम्वा ङीप्) अटनिः । धनुष्कोटिः । इत्यमरः ॥ (यथा उत्तरचरिते । ध्वनद्गुरुगुणाटनीकृतकरालकोलाहलं ।) ॥

अटरूषः, पुं, पतत्यनेन वासकवृक्षः । इत्यमरः ॥

अटरूषः, पुं, (अटति गत्यग्रासे पतत्यनेन अट + घञर्थे कः । अटं कासाख्यरोगं रोषति नाशयति रुष् + कर्त्तरि कः । अथवा रूष् + कर्त्तरि कः अटस्य रूषो वा षष्ठीतत्पुरुषः । वासकः कासनाशक इति वैद्यके) वासकवृक्षः । इत्यमरटीकायां रायमुकुटः ॥

अटविः, स्त्री, (अटति वार्द्धक्ये गच्छति यत्र अट् + अधिकरणे अवि पश्चाश्रति वनं व्रजेदिति ।) वनं । इति रायमुकुटः ॥

अटवी, स्त्री, (अटवि + स्त्रियां ङीप्) वनं । इत्यमरः । (यथा रामायणे । आनर्त्तांश्चैव मार्गध्वं कान्ताराण्यटवीस्तथा ।) ॥

अटा, स्त्री, (अट् + भावे अङ् ततष्टाप्) पर्य्यटनं । भ्रमणं । इति रत्नकोषः नीलकण्ठश्च ॥

अटाट्या, स्त्री, (पौनः पुन्येन अटनं भ्रमणम् अट् + सूचिसूत्रिमूत्र्यट्यर्त्त्यादिना यङ् + भावे अ । स्त्रियां टाप्) पर्य्यटनं । इत्यमरः ॥ पुनःपुनर्भ्रमणं । अतिशयभ्रमणं । इति व्याकरणं ॥) अट्ट क तौच्छ्ये । अनादरे । इति कविकल्पद्रुमः ॥ टद्यान्तः । क अट्टयति । स्कटकार उति रामः ॥ तौच्छ्यमल्पीभावः । इति दुर्गादासः ॥

अट्ट ङ अतिक्रमे । वधे । इति कविकल्पद्रुमः ॥ मूर्द्धन्यवर्गाद्योपधः । ङ अटिट्टिषते दन्त्यवर्गाद्योपधः । ङ अतिट्टिषते । दन्त्यवर्गतृतीयोपधः । ङ अट्टितिषते खलं राजा । इति दुर्गादासः ॥

अट्टं, क्ली, (अट्ट + अच्) शुष्कं । भक्तं । अन्नं । इति मेदिनी भूरिप्रयोगश्च ॥

अट्टः, पुं, (अट्टते स्कं गृहमतिक्रम्य यत्र गृहं गच्छति अट्ट + अधिकरणे घञ्) क्षौमः । इत्यमरः ॥ हर्म्म्यादिगृहं । इति भरतः । प्राकाराग्रस्थितरथगृहं । इति कौटिल्यः । अट्टेति ख्यातगृहविशेषः । इति कोक्कटः ॥ प्राकारमण्डपस्योपरि शाला । इति केचित् ॥ हर्म्म्यादिवातकुटिका । इति केचित् ॥ मण्डपोपरि हर्म्म्यास्थं । इति केचित् ॥ प्राकारधारणार्थोऽभ्यन्तरे क्षौमाख्योऽट्टः । इति भट्टः ॥ अतिशयः । इति मेदिनी ॥ हट्टः इति हेमचन्द्रः ॥

अट्टट्ट व्य (वीप्सायादिर्व्वचनम् शकन्ध्वादित्वात् पररूपत्वमस्य अट्टट्टहासमशिवं शिवदूती चकार हेति चण्डी) अव्ययं । इति जटाधरः ॥

अट्टनं (क्ली) चक्रफलास्त्रं । इति त्रिकाण्डशेषः ॥

अट्टहासः, पुं, महत्तरो हासः । शब्दयुक्तहास्यं । इति हेमचन्द्रः ॥ (यथा देवीमाहात्म्ये । देवीननादोच्चैः साट्टहासं मुहुर्मुहुः ॥ त्र्यम्बकस्याट्टहासः ॥ मेघदूते) ॥

अट्टहासकः, पुं, (अट्टं सातिशयं हासकः अतिश्वेतपुष्पत्वात् हास्यकारीव द्वितीयातत् पुरुषः) कुन्दपुष्प वृक्षः । इति राजनिर्घण्टः ॥

अट्टहासी [न्] पुं, (अट्टं सदानन्दत्वात् सातिशयं हसति अट्ट + हस + णिनि उपपद समासः) शिवः । इति हेमचन्द्रः ॥

अट्टालः, पुं, (अट्टवत् प्रासादगृहवत् अलति भवति अल + अच्) प्राकारादुपरितनमुन्नतस्थानं । इति श्रीधरस्वामी ॥ यथा । भज्यमानपुरोद्यानप्राकाराट्टालगोपुरं । इति श्रीभागवतं ॥

अट्टालकः, पुं, (अट्टवत् प्रासादगृहवत् अलति भवति अल् + अच् स्वार्थे कन्) उपरितनगृहं । अट्टालिकोपरि गृहं । तत्पर्य्यायः । क्षौमः २ अट्टः ३ । इति हेमचन्द्रः ॥

अट्टालिका, स्त्री, (अट्टाल + स्वार्थे कन् स्त्रियां टाप्) राजगृहं । तत्पर्य्यायः । नृपागारं २ हर्म्म्यं ३ सौधं ४ धवलागारं ५ । इति जटाधरः ॥ (राजतरङ्गिनी, अटिलाट्टालिकादिभ्यो देशेभ्यः ।)

अट्टालिकाकारः, पुं, (अट्टालिकां करोति यः अट्टालिका + कृ + अण् उपपद समासः प्रासादकारकः) शूद्रागर्भे चित्रकारौरसजातजातिविशेषः । तस्य कर्म्म गृहनिर्म्माणादि । राज इति थैकर इति च भाषा ।

"कुलटायाञ्च शूद्रायां चित्रकारस्य वीर्य्यतः ।
बभूवाट्टालिकाकारः पतितो जारदोषतः" ।

इति ब्रह्मवैवर्त्तपुराणं ॥

अट्या, स्त्री, (अटनम् अट् + भावे क्यप् स्त्रियां टाप् समस्या इति वत्) परिभ्रमणं । पर्य्यटनं । इत्यमरटीकायां रायमुकुटः ॥ यथा,—

"तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः" ।

इति स्मृतिः ॥

अठ इ ङ गतौ इति कविकल्पद्रुमः ॥ इ (कर्म्मणि) अण्ठ्यते ङ अण्ठते ।इति दुर्गादासः ॥

अठ गतौ । इति कविकल्पद्रुमः ॥ अठति । इति दुर्गादासः ॥

अड र न व्याप्तौ (स्वादिं सेट् ।) इति कविकल्पद्रुमः ॥ र वैदिकः । न अड्नोति । इति दुर्गादासः ॥

अड उद्यमे । (भ्वादिं सेट् परं ।) इति कविकल्पद्रुमः ॥ अडति लोकः सुखाय । इति दुर्गादासः ॥

अड्ड अभियोगे । इति कविकल्पद्रुमः ॥ मूर्द्धन्यवर्गतृतीयोपधः । (भ्वादिं सेट् परं अड्ड + सन् लट् तिप्) अडिड्डिषति । क्विपि संयोगान्तलोपे अड् । अभियोगः समाधानं । अड्डति पक्षं विद्वान् । अभि समन्तात् योगोऽभियोग इति गोविन्दभट्टः ॥ इति दुर्गादासः ।

अण रवे । इति कविकल्पद्रुमः ॥ अणति । रवः शब्दः । इति दुर्गादासः ॥

अण य ङ जीवने । प्राणने । इति कविकल्पद्रुमः ॥ य ङ अण्यते जनो दुःखेन जीवतीत्यर्थः । इति दुर्गादासः ॥

अणकः, त्रि, (अण + अच् कुत्सायां कन्) कुत्सितः अधमः । इत्यमरः ॥

अणव्यं, क्ली, (अणोः सूक्ष्मशस्यस्य चीनादिकस्य भवन मुत्पत्तिस्थानमिति यावत् अणु + यत्) आणवीनं (अणोः, सूक्ष्मशस्यस्य चीनादिकस्य भवनमुत्पत्तिस्थानमिति यावत् अणु + खञ् तस्य इनः आदिवृद्धिश्च) । अणुधान्योत्पादकक्षेत्रं । इति रायमुकुटः ॥

अणिः, पुं, स्त्री (अणति शब्दायते अण् + इन् स्त्रियां वा ङीप्) अक्षाग्रकीलकः । रथचक्राग्रस्थित कीलः । इत्यमरः ॥ अस्रिः । सूच्याद्यग्रभागः । सीमा । इति मेदिनी ॥ तस्य रूपान्तरं । अणी । आणिः (अणति शब्दायते अण् + इञ्, अजादिभ्यश्च इति इञ्, आजि इति वत्) । इत्यमरटीका ॥

अणिमा [न्] पुं, (अणु + भावे इमनिच । अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ईशित्वञ्च वशित्वञ्च तथा कामावसायिता इति सांख्यतत्त्वकौमुद्याम्) अणोर्भावः । अणुत्वं । सूक्ष्मता । इति व्याकरणं । अष्टविधैश्वर्य्यमध्ये ऐश्वर्य्यविशेषः । इत्यमरः ॥ यत्प्रभावात् देवाः सिद्धाश्च सूक्ष्मीभूय सर्व्वत्र विचरन्ति कैश्चिदपि न लक्ष्यन्ते । इति तट्टीका ॥

("अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता" ॥

इति आगमः ।)

अणीयः, [स्] त्रि, अतिशयेन अणुः अणु + ईयसुन्) अत्यल्पं । अतिसूक्ष्मं । इत्यमरः ॥ (यथा मनुः,—

"प्रशासितारं सर्व्वेषामणीयांसमणोरपि ।
रुक्माभं स्वप्नधीगम्यं विद्यात् तं पुरुषं परं" ॥)

अणु, त्रि, (अणति सूक्ष्मत्वं गच्छति अण् + उन् । लवलेशकणाणवः इत्यमरः) क्षुद्रं । सूक्ष्मं । इति मेदिनी ॥

अणुः, पुं, (अण् + उन्) लेशः । व्रीहिविशेषः । सूक्ष्मधान्यं । चिना इत्यादि भाषा । इत्यमरः । (यथा मनुः । न गृह्णीयात् शुल्कमणवपि ॥)

अणुकः, त्रि, (अणुप्रकारः अणु + स्थूलादित्वात्